# Shri Parthasarathi Suprabhatam

# શ્રીપાર્થસારથિ સુપ્રભાતમ્

## Document Information

Text title : Parthasarathi Suprabhatam

File name : pArthasArathisuprabhAtam.itx

Category : vishhnu, suprabhAta, krishna

Location : doc_vishhnu

Transliterated by : NA

Proofread by : NA, PSA Easwaran

Latest update : May 23, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શ્રીપાર્થસારથિ સુપ્રભાતમ્

કૌસલ્યા-સુપ્રજા રામ પૂર્વા સન્ધ્યા પ્રવર્તતે
ઉત્તિષ્ઠ નરશાર્દૂલ કર્તવ્યં દૈવમાહ્નિકમ્ ॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગોવિન્દ ઉત્તિષ્ઠ ગરુડધ્વજ ।
ઉત્તિષ્ઠ કમલાકાન્ત ત્રૈલોક્યં મઙ્ગલં કુરુ ॥

વન્દે વૃન્દાવનાન્તે મણિગણવિલસત્સૌધહર્મ્યે ગૃહાઢ્યે
સમ્રાજત્કૈરવિણ્યાસ્તટભુવિ ઘૃણિમદ્ગોપુરે સાલરમ્યે ।
આનન્દાખ્યે વિમાને મુનિગણવિનુતં પાર્થસૂતં ચ રામં
રઙ્ગેશં શ્રીનૃસિંહં ગજવરવરદં શ્રીક્ષિતિભ્યાં સમેતમ્ ॥ ૧॥

માતઃ શ્રીર્જગતામશેષજગતાં નાથસ્ય ભર્ત્તુઃ પ્રિયે
તદ્વક્ષસ્થલનિત્યવાસિનિ સદા શ્રીવેદવલ્યાહ્વયે ।
વૃન્દારણ્યનિવાસિયોગિસદને સમ્ભૂય વારાન્નિધે-
ર્મન્નાથામરભૂરુહેણ સહિતે નૈશં પ્રભાતં શુભમ્ ॥ ૨॥

શ્રીમદ્વેદલતાં શ્રિતામૃતલતાં વૃન્દાવને સંસ્થિતાં
સમ્યગ્દૃષ્ટપરાવરેણ મુનિના સંવર્ધિતાં તદ્ધિતામ્ ।
લબ્ધ્વા તાં સમુપેત્ય દુગ્ધજલધેસ્તદ્દત્તનામા વસન્
મન્નાથાશ્રિતકલ્પભૂરુહવિભો તે સુપ્રભાતં હરે ॥ ૩॥

સમસ્તકલ્યાણગુણૈકધામ્નઃ સ્વશક્તિલેશોદ્ધૃતભૂતલસ્ય ।
પ્રહ્લાદભક્તેઃ પરિવર્ધકસ્ય મન્નાથનામ્નસ્તવ સુપ્રભાતમ્ ॥ ૪॥

શ્રીમત્કૈરવિણીસરોવરતટે નિત્યં તપઃ કુર્વતે
સમ્યગ્જ્ઞાનવતાં વરાય ભૃગવે દત્વા ત્વભીષ્ટં વરમ્ ।
લબ્ધ્વા તસ્ય સુતાં જગત્ત્રયમુદે તસ્મૈ પ્રસન્નસ્ય તે
મન્નાથાદ્ય હિ સુપ્રભાતમખિલાંસ્ત્રાતું પ્રસીદ પ્રભો ॥ ૫॥

શ્રીમન્ ધરાપરવિમોચનદીક્ષિતં ત્વાં

સમ્બોધયન્તિ વિધિશઙ્કરશક્રમુખ્યાઃ ।
સ્વામિન્ જગત્ત્રયવિભો યદુવંશનાથ
શ્રીપાર્થસૂત ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૬॥

ભાસ્વાન્ વિકાસયતિ પઙ્કજકુડ્મલાનિ
પદ્માકરેષુ પરિકૂજિતસારસેષુ ।
કૂજન્તિ પઞ્જરશુકાઃ સહ સારિકાભિઃ
શ્રીપાર્થસૂત ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૭॥

વીણાં પ્રગૃહ્ય મુનિવાહનયોગિવર્યો
ગાનં કરોતિ સહ તુમ્બુરુનારદાદ્યૈઃ । var તુમ્બુરુનારદાદ્યાઃ
સઙ્ગીતવાદ્યનિપુણાસ્તવ સુપ્રભાત-
ગાથાઃ પઠન્તિ યદુનન્દન સુપ્રભાતમ્ ॥ ૮॥

બ્રહ્માદયસ્સુરપતિપ્રમુખા દિગીશાઃ
સ્વસ્વાધિકારનિયતાસ્તવ સૈન્યનાથાઃ ।
સંપ્રાર્થયન્તિ તવ સદ્મપુરોવિભાગે
શ્રીપાર્થસૂત ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૯॥

ગોપાઙ્ગનાસ્તવ હિ મઙ્ગલગીતકાનિ
ગાયન્તિ કામશરપીડિતગાત્રયષ્ટ્યઃ ।
ગોપાલબાલકકુલાનિ વિસૃજ્ય વત્સાન્
ત્વાં પ્રાર્થયન્તિ યદુશેખર સુપ્રભાતમ્ ॥ ૧૦॥

સ્નેહપ્રતિસ્નુતપયોધરપારયુક્તાઃ
ગાવઃ સ્વવત્સસહિતાઃ પરિતોષયુક્તાઃ ।
વત્સાન્ વિસૃજ્ય ચ પયઃ પરિદોહયન્તિ
ગોપાલકાસ્તવ યદૂદ્વહ સુપ્રભાતમ્ ॥ ૧૧॥

વૃન્દાવને વિહરતાં પશુપાલકાનાં
રક્ષાર્થમાત્તવરવેત્ર સુશઙ્ખપાણે ।
ભ્રાત્રા સમેત સુમનોહર ભૂષણાર્હ
પ્રોત્તિષ્ઠ પાર્થરથપાલક સુપ્રભાતમ્ ॥ ૧૨॥

વૃન્દાવનાન્તરમનોજ્ઞવનાન્તરેષુ
નાનાતરુપ્રવરશોભિજલાશયેષુ ।
કૂજદ્વિહઙ્ગમગણેષુ મધુવ્રતાનિ

ગાયન્તિ પાર્થરથનાયક સુપ્રભાતમ્ ॥ ૧૩॥

મન્દારકુન્દવરકૈતકમાધવીનાં
આમોદનિર્ભરવનાન્તરનિસ્સૃતોઽસૌ ।
મન્દાનિલઃ પ્રસરતિ પ્રવરઃ પ્રભાતે
શ્રીપાર્થસૂત  ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૧૪॥

સમ્ફુલ્લકૈરવસરોવરનીરસંસ્થાઃ
હંસાસ્સચક્રમિથુનાસ્સહ સારસૈશ્ચ ।
તીરે તુ દેશિકગણૈસ્સહ સંવિવાદાન્
તન્વન્તિ પાર્થરથનાયક સુપ્રભાતમ્ ॥ ૧૫॥

તદ્દેશિકાઃ સકલશાસ્ત્રવિદાં વરિષ્ઠાઃ
ત્વત્પ્રોક્તદિવ્યચરમાર્થનિવિષ્ટભાવાઃ ।
કાસારયોગિમુખદેશિકસૂક્તિનિષ્ઠાઃ
તિષ્ઠન્તિ કિઙ્કરકૃતૌ તવ સુપ્રભાતમ્ ॥ ૧૬॥

શ્રીભટ્ટનાથકૃતિભિસ્તવ મઙ્ગલાનિ
શંસન્તિ દેશિકવરાસ્ત્વમિતપ્રભાવાઃ ।
ગોદાસુસૂક્તિભિરપિ પ્રવિબોધયન્તિ
શ્રીપાર્થસૂત ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૧૭॥

સૂર્યોદયે ગ્રહગણાસ્ત્વિતરે સુરેન્દ્રાઃ
આજ્ઞાં તવૈવ નિજવૈભવસંપ્રયુક્તાઃ ।
સંપ્રાર્થ્ય તોષિતુમિહાદ્ય જગત્પતિં ત્વાં
તિષ્ઠન્તિ પાર્થરથનાયક સુપ્રભાતમ્ ॥ ૧૮॥

નિત્યાર્ચનાં રચયિતું વિવિધોપહારાન્
વસ્તૂનિ વસ્ત્રવરદિવ્યવિભૂષણાનિ ।
સઙ્ગૃહ્ય વૈદિકશિખામણયઃ પ્રભાતે
તિષ્ઠન્તિ પાર્થરથભૂષણ સુપ્રભાતમ્ ॥ ૧૯॥

કાશ્મીરકેસરયુતં હરિચન્દનઞ્ચ
કસ્તૂરિકાં ચ ઘનસારવરં ગૃહીત્વા ।
દ્વારિ સ્થિતાસ્તવ હિ દાસગણાસ્સમસ્તાઃ
શ્રીપાર્થસૂત ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૨૦॥

સમ્ફુલ્લપઙ્કજનવોત્પલકૈરવાણિ
　　સઞ્ચમ્પકૈર્મરુવકૈઃ કૃતમાલિકાનિ ।
સઙ્ગૃહ્ય તાવકસમર્ચનમાદરેણ
　　તિષ્ઠન્તિ કર્તુમનઘાસ્તવ સુપ્રભાતમ્ ॥ ૨૧॥

ભાગ્યાધિકાસ્તવ પદાબ્જનિવિષ્ટભાવાઃ
　　પીતામ્બરાણ્યપરિમેયવિભૂષણાનિ ।
રત્નાનિ કાઞ્ચનયુતાનિ સમર્પયન્તિ
　　શ્રીપાર્થસૂત ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૨૨॥

પ્રાતઃપ્રયુક્તનવનીતપયઃફલાનિ
　　મુદ્ગાન્નલડ્ડુકમનોહરમિશ્રિતાનિ ।
સોપાયનાનિ ચ સમર્પયિતું યતન્તે
　　શ્રીવૈષ્ણવાસ્તવ યદૂદ્વહ સુપ્રભાતમ્ ૨૩॥

ભેરીમૃદઙ્ગપટહાનકગોમુખાદિ-
　　વાદ્યાનિ ઘોષયતિ દાસગણસ્તવાગ્રે ।
તિષ્ઠન્તિ નર્તનપરા ગણિકાસ્સમસ્તાઃ
　　શ્રીપાર્થસૂત ભગવંસ્તવ સુપ્રભાતમ્ ૨૪॥

હસ્તીન્દ્રમૂર્ધ્નિ ધૃતકાઞ્ચનકુમ્ભતીર્થં
　　છત્રાવૃતં વિધૃતચામરયુગ્મમારાત્ ।
શ્રીમન્ પ્રભો તવ હિ મઙ્ગલમજ્જનાય
　　શ્રીપાર્થસૂત ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૨૫॥

એકાન્તિનશ્ચ વિમલાશયયોગિવર્યાઃ
　　અધ્યાપકાસ્તવ પદાબ્જનિવિષ્ટભાવાઃ ।
તિષ્ઠન્તિ સન્નિધિમુપેત્ય ભવત્પદાબ્જે
　　સેવાર્થમર્જુનસખે તવ સુપ્રભાતમ્ ॥ ૨૬॥

ત્વત્સેવનાય સકલદ્રવિડાગમાનાં
　　વક્તા પરાઙ્કુશમુનિસ્સ્વપદપ્રપન્નૈઃ ।
રામાનુજોઽપિ કૃતનિત્યસમસ્તકૃત્યઃ
　　ત્વદ્દ્વારિ તિષ્ઠતિ વિભો તવ સુપ્રભાતમ્ ॥ ૨૭॥

ઉત્તિષ્ઠ લક્ષ્મણગુરો સહ સીતયાઽદ્ય
　　ધર્મં વિવર્ધય વિભો જય પાલયાસ્માન્ ।

દાસાન્ કુરુષ્વ સહસા તવ કિઙ્કરાંશ્ચ
 તે સુપ્રભાતમધુના રઘુવંશનાથ ॥ ૨૮॥

શ્રીમન્ ગજેન્દ્રવરદાશ્રિતપારિજાત
 શ્રીવૈનતેયભુજમૂલવિભૂષણાઢ્ય ।
ઇન્દ્રાદિદેવગણપૂજિતપાદપદ્મ
 શ્રીમન્ વરપ્રદ સુરેશ્વર સુપ્રભાતમ્ ॥ ૨૯॥

શ્રીમન્ નૃસિંહ જગતાં જનિહેતુભૂત
 સમ્પાલનાન્તકરણાદિષુ જાગરૂક ।
અન્તઃપ્રવિશ્ય ચ નિયન્તૃતયા ભવાસ્માન્
 શ્રીમન્ નૃસિંહ ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૩૦॥

શ્રીમન્ નૃસિંહ તવ મઙ્ગલમસ્તુ નિત્યં
 સૂર્યેન્દુતારકસમાનમહઃપ્રરોહૈઃ ।
નૈશં તમઃપ્રસરમાન્તરમપ્યપાસ્તં
 સ્વામિન્ નૃસિંહ ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૩૧॥

કાવ્યોઽપિ પૂર્વદિશિ સંસ્થિતપર્વતસ્થો
 વાચાં પતિર્હિમકરોઽસ્તમિતો બભૂવ ।
પક્ષી નિનાદમપિ પઞ્જરગઃ કરોતિ
 શ્રીમન્ નૃસિંહ ભગવંસ્તવ સુપ્રભાતમ્ ॥ ૩૨॥

શ્રીપાર્થસારથિ રઘૂત્તમ વેદવલ્લી-
 મન્નાથ સૌમ્યનરસિંહવરપ્રદાનામ્ ।
યે સુપ્રભાતમનિશં પ્રપઠન્તિ તેષાં
 બ્રહ્મેશ્વરાદ્યસુલભં સુલભં પદં સ્યાત્ ॥ ૩૩॥

ઇતિ શ્રીપાર્થસારથિ સુપ્રભાતમ્ ।

Proofread by PSA Easwaran

*Shri Parthasarathi Suprabhatam*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*